# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य-2 | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 5 - CE - 5.3.3** | **समयः- 3 तः 6** |
| **दिनाङ्कः- 14/10/2019** | **सन्दर्भग्रन्थः –** देवीभागवतम् – १ – २ स्कन्धौ | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या । 05**

1. ये श्रृष्वन्ति सदा भक्त्या देव्या भागवती कथाम् ।
   तेषां सिद्धिर्न दूरस्था तस्मात् सेव्या सदा नृभिः ।।
2. इदं मया भागवतस्य विप्रा माहात्म्यमुक्तं भवतां सलक्षम् ।
   श्रृणोति भक्त्या पठतीह भोगान् भुक्त्वाऽखिलान् मुक्तिमुपैति चान्ते ।।

**प्र-2 एकस्य यथाग्रन्थं वर्णनं कुरुत । 10**

1. स्कन्दपुराणोक्तदिशा देवीभागवतमाहात्म्यं वर्णयत ।
2. श्राद्धदेवमनुवृत्तान्तवर्णनं ग्रन्थोक्तदिशा वर्णयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 ससन्दर्भं व्याख्या कार्या । 05**

1. सकलभुवनमेतत् कर्तुकामा यदा त्वं सृजसि जननि देवान् विष्णुरुद्राऽजमुख्यान् ।
   स्थितिलयजननं तैः कारयस्येकरूपा न खलु तव कथञ्चिद्देवि संसारलेशः ।।
2. देवि त्वमस्य जगतः किल कारणं हि ज्ञातं मया सकलवेदवचोभिरम्ब ।
   यद्विष्णुरप्यखिललोकविवेकर्ता निद्रावशं च गमितः पुरुषोत्तमोऽद्य ।।

**प्र-4 एकस्य सारः देयः । 10**

1. पुररवस उर्वश्याश्चरितम् ।
2. मधुकैटभयोर्युद्धम् ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 एकस्य ससन्दर्भं व्याख्या कार्या । 05**

1. मनस्तु सुखदुःखानां महतां कारणं द्विज ।
   जाते तु निर्मले ह्यस्मिन्सर्वं भवति निर्मलम् ।।
2. कुलेन शीनेल तथा श्रुतेन द्विजोत्तमस्त्वं किलधर्मविच्च ।
   अनार्यभावं कथमागतोऽसि विप्रेन्द्र मां वीक्ष्य च मीनगन्धाम् ।।

**प्र-6 एकस्य समीक्षा कार्या।** **10**

1. जनकस्य परीक्षार्थं शुकस्य मिथिलागमनम्।
2. पराशराद्दासकन्योदरे व्यासस्य जन्म।

**प्र-7 एकस्य ससन्दर्भं व्याख्या कार्या। 05**

1. किं तेन जातेन सुतेन राजन् दु:ख न जानाति न नाशयेद्यः।
   ऋणं ग्रहीतुं समुपागतोऽसौ प्राग्जन्मजं नात्र विचारणाऽस्ति ।।
2. धिक्तं सुतं यः पितुरीप्सितार्थं क्षमोऽपि सन्न प्रतिपादयेद्यः।
   जातेन किं तेन सुतेन कामं पितुर्न चिन्तां हि समुद्धरेद्यः ।।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य परिचयः देयः । 10**

1. व्यासात् पुत्रत्रयोत्पत्तिः।
2. शन्तुना सत्यवत्याः वरणम्।

**(पञ्चमान्वितिः - युनिट- 5 )**

**प्र-10 दशानां समाधानं ददतु। 10**

1. प्रथमस्कन्धे कति अध्यायाः
2. वेदविभाजनं कः कृतवान्
3. पुराणसंहितां कः दध्यौ
4. सद्यः किन्नाम वनं पुनाति
5. नरैः सदा किं सेव्यम्
6. धर्मार्थकाममोक्षणामुत्तमं साधनं किं मतम्
7. सुधीः कमाहूय मुहूर्तं कल्पयेत्
8. महात्मने शुकाय पुराणं केन पाठितम्
9. कः राजकुमारः वने स्त्रीत्वमापन्नः
10. मेरुश्रृङ्गे महारण्ये कः तपश्चचार
11. दैवमेव परं मन्ये - इति कः ब्रूते
12. सरस्वत्याः तीरे कस्याश्रम अवर्तत
13. देवी हयग्रीवाय किमभिष्टं दातुमैच्छत्
14. सैन्धवं हयमारुह्य कः वने चचार
15. श्रवणं कतिविधं प्रोक्तम्

**********************